# सीता



भगवती सीता 'उत्तररामचरितम्' नाटकस्य नायिका अस्ति, सीता मुग्धा नायिका अस्ति। सीतया सम्पूर्ण जीवनं यावत् पातिव्रत्य धर्मः पालितः। पातिव्रत्यव्रतोपासने आजीवनं दुःखमनुभूतवती। सीतायाः जन्मदात्री भगवति वसुन्धरा अस्ति तथा विदेहराज जनकः तस्याः पिता अस्ति यथा अष्टावक्र प्रथमेऽङ्के कथयति —

"विश्वम्भरा भगवती भवतीमसूत,
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां,
येषां कुलेषु सविता च गुरुर्वयञ्च॥

रामाय सीतायाः सर्वं रोचते किन्तु विरह असह्यः यथा रामः कथयति —

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं बाहुकण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः॥

सीतायाः रामं प्रति कियत् प्रेमः अस्ति, अस्योदाहरणं सम्पूर्णे तृतीयेऽङ्के अनुभवति यथा, सीता —
'तस्मै कोपिष्यामि यदि तं प्रेक्षमाणा आत्मनः ~~प्रभविष्या~~ प्रभविष्यामि।"

रामानन्दे आनन्दोत्सव

परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी ॥

विद्येः क्रौर्यात् रामः लोकानुरञ्जनाय ~~स्व~~ आत्मनः हृदयभूतां, स्वशरीरस्य प्राणभूतां सीतां परित्यजति। यत्र रामः वसिष्ठ, अरुन्धती कौसल्यादीनां महीषीणां आज्ञया सर्वप्रकारकं सुखं दातुमिच्छति तत्रैव लोकानुरञ्जनाय गहनारण्यं त्यजति।

स्वकीय अकारणनिर्वासनेन सीतायाः हृदयस्य रामस्य स्नेहे शङ्का स्वाभाविका पुनरपि सीतायाः हृदये रामं प्रति प्रेमं ~~स्नेहः~~ किञ्चिदपि न्यूनं न भवति यथा छायाङ्के वासन्ती रामं उपालम्भयति– "अयि कठोर ! यशः किल ते प्रियं किमयशो ननु घोरमतः परम् ।" वासन्त्याः ~~हृदं~~ उपालम्भ श्रुत्वा सीता कथयति– 'सखि वासन्ति ! त्वमेव दारुणा कठोरा च, यैवं प्रलपन्तं प्रलापयसि ।' सीतायाः वचनमिदं तस्याः स्नेहस्य निर्मलतायाः उत्कृष्ट प्रमाणमस्ति।

सीता ईदृशी हतभाग्या जननी अस्ति, यस्याः पुत्राणां ~~बाल्य~~ बाल्यावस्थायाः सुखं तस्याः प्रियेणैव प्राप्तम् न तयैव यथा तृतीयेऽङ्के सीता कथयति → "किं वा मया प्रसूतया येन तादृशमपि मम पुत्रकयोरीषद्विरलकोमलधवलदशनोज्ज्वलकपोलमनुबद्ध-

DATE: / /

-मुग्धकाकलीविहसितं निबद्धकाकशिखण्डकम् अमलमुख-
-पुण्डरीकयुगलं न परिचुम्बितमार्यपुत्रेण ।"

सीता तु जानाति अपि यत् तस्याः द्वौ पुत्रौ अभवताम्, तौ वाल्मीकस्याश्रमे पठन्तः स्तः; किन्तु रामः तु इयं वार्ता न जानाति । एकप्रकारेण सीतायाः दुःखमपि रामस्य दुःखमिव ऐकान्तिकं अस्ति। सीता यदा द्वादशवर्षानन्तरं मिलति तदा सा कथयति -"चिरस्य परिष्वजेथां मां पुनर्जन्मा-
-न्तरगतां जननीम् ।"

एतेन ज्ञायते यत् सीता एका ईदृशी नायिका अस्ति यया आजीवनं पातिव्रत्यव्रतं पालितम्। यस्यपालने तया द्विवारं असह्यः प्रियविरहः सोढः। तया अकारणेन प्रियपरित्यागः सोढः। सा न केवल पति विरहेण पीडिताः अपितु पुत्रविरहेणापि द्वादशवर्षं पर्यन्तं पीडिता ।

Scanned with CamScanner